श्रीगणेशाय नमः॥ रामं विनायकं वंदे सदानंदं गुणाकरं। संसारतापसंहारकारणं विघ्नवारणं॥ अथ कश्चन्महात्मा वेदांतवासितांतःकरणो ध्यापितवेदांतसिद्धांतमपि तत्त्वावबोधपराङ्मुखं नाटकादिरसिकं परमकारुणिकाः श्रीकृष्णमिश्राः प्रबोधचंद्रोदयाख्यनाटकव्याजेन तत्त्वं बोधयिषंति स्म॥ तत्राद्यपद्यद्वयेन नांदीसंज्ञकेन निर्विघ्नसमाप्तये कृतं मंगलं निबध्नंति॥ मध्याह्नेति

मध्याह्नार्कमरीचिकास्विव पयःपूरो यदज्ञानतः खं वायुर्ज्वलनो जलं क्षितिरिति त्रैलोक्यमुन्मीलति॥ यत्तत्त्वं विदुषां निमीलति पुनः स्रग्भोगिभोगोपमं सांद्रानंदमुपास्महे तदमलं स्वात्मावबोधं महः॥१॥

॥ वयं तद्वेदोपनिषदं महस्तेजः उपास्महे सेवयामः। कीदृशं महः सांद्रानंदं सांद्रो निबिडो नित्यो य आनंदः तद्रूपं। पुनः कीदृशं महः। अमलं अविद्यातत्कार्यादिदोषशून्यं। पुनः कीदृशं स्वात्मावबोधं स्वस्वरूपमेवावबोधः प्रकाशो यस्य स्वं प्रकाशमित्यर्थः। तत्किं यदज्ञानतः यस्य अज्ञानात् इति इदं त्रैलोक्यं उन्मीलति। प्रादुर्भवति। इदं किं तत्राह। खमित्यादि। अज्ञानात् प्रपंचोत्पत्तिं लोकदृष्टांतेनाह। मध्याह्नार्कमरीचिकासु पयःपूर इव यथा मध्याह्ने सिकतादिप्रतिफलितेषु अर्ककिरणेषु तद्विषयाज्ञानात्पयःपूरज्ञानं जायते। तथा सत्यानंदादिरूपब्रह्माज्ञानात्प्रपंचजनिरित्यर्थः। एवं चेत्कथमनर्थनिवृत्तिरित्याशंक्य सदृष्टांतमाह। यत्तत्त्वं त्रैलोक्यस्य

तात्कालिकं स्वरूपं विदुषां ज्ञानिनां पुनर्निमीलति नश्यति। आत्मस्वरूपातिरिक्तं न भवति। किंतु ब्रह्मस्वरूपेणातिष्ठतीत्यर्थः। तत्र दृष्टांतः। स्रग्भोगिभोगोपमं स्रजि मालायां उत्पन्नो यो भोगिभोगः सर्पदेहः तेनोपमेयं। तथा चायमर्थः माला साक्षात्कारात् तद्भिन्नः सर्पदेहो न भवति। किंतु तत्स्वरूपेणावभासते। एवं ब्रह्माद्वैतसाक्षात्कारात्स्वरूपातिरिक्तः स्वस्वरूपेण प्रपंचो न भवति॥१॥ अपि च॥ एवं सति अज्ञाननिवृत्तिः प्रयोजनं। प्रयोजनकामोधिकारी। प्रतिपाद्यप्रतिपादकभावः संबंधः। एवमस्य

अंतर्नाडीनियमितमरुल्लंघितब्रह्मरंध्रं स्वांते शांतिं प्रणयिनि समुन्मीलदानंदसांद्रं॥ प्रत्यग्ज्योतिर्जयति यमिनः स्पष्टलालाटनेत्रव्याजव्यक्तीकृतमिव जगद्व्यापि चंद्रार्धमौलेः॥२॥

मभिधेयमित्यादि प्रदर्शितं। अपि चेति। प्राक्तनमंगलसमुच्चयार्थश्चशब्दः। अंतरिति। चंद्रार्धमौलेः चंद्रशेखरस्य प्रत्यग्ज्योतिः जगत् अहंकारादिभ्यः प्रतिकूल्येन सत्यज्ञानानंदादिरूपत्वेनांत्वति प्रकाशते। तत्प्रत्यक् च तत् ज्योतिश्च प्रकाशरूपं जयति। जयः सर्वोत्कर्षेण निरपेक्षतेत्यर्थः। कीदृशं प्रत्यग्ज्योतिः। अंतर्नाड्यां सुषुम्नायां नियमितः सन्निरुद्धः श्वासो मरुच्च तेन लंघितमुल्लंघितं ब्रह्मरंध्रं येन तत्। कस्मिन् सति। स्वांते अंतःकरणे शांतिं प्रणयिनि उपशमं याते सति। पुनः कीदृशं ज्योतिः समुन्मीलन् प्रकटीभवन् आनंदः सुखं तेन सांद्रं अभिन्नं स्वप्रकाशसुखाभिन्नमित्यर्थः। कीदृशस्य चंद्रार्धमौलेः यमिनो ध्यानशीलस्य योगासक्तस्येत्यर्थः। उत्प्रेक्षते कीदृ

२ दृशामिव ज्योतिः प्रकटं ललाटसंबंधि ललाटे नेत्रं तृतीयं चक्षुः तद्व्याजेन तन्मिषेण अव्यक्तं च यत्नतः संपन्नं त
तथाभूतं व्यक्तीकृतं प्रकटीकृतमिव । पुनः कीदृशं । जगत् व्याप्य जगत् व्याप्नोतीति विपर्ययीकरोतीति तत् । श्री
मद्भगवतश्चक्षुषः उद्योतः । अतीव सम्मीलनेनेति रहस्यं ॥ २ ॥ अनेनाद्यपद्यद्वयेन वेदांतसिद्धांतरह
स्यं प्रकटयता मिश्रेणाभिधेयं निरूपितं । नांद्यभिनयेन कथां प्रस्तावयति । नांद्यंते सूत्रधार इति ।
नांदी नाटकादौ पद्यादिरूपा सूत्रधारो नाटकाचार्यः वक्तीति शेषः ॥ अलमिति । नांदीपाठेनैव न सम

अलमतिविस्तरेण आदिष्टोऽस्मि । सकलसामंतचक्रचूडामणिमरीचिमंजरीनीराजितचरण
कमलेन बलवदरिपुजनवक्षःस्थलकपाटनप्रकटितनरसिंहरूपेण ॥ प्रबलतरनरपतिकुलप्रल
यमहार्णवमग्नमेदिनीसमुद्धरणमहावराहेण । निखिलदिग्विलासिनीकर्णपूरीकृतकीर्तिल
तापल्लवेन समस्ताशास्तंबेरमकर्णतालास्फालनबहलपवनसंपातनर्तितप्रतापानलेन श्री
मता गोपालेन ॥ यथा ॥

येन नेतव्या इति भावः ॥ आदिष्टोऽस्मि इति । आदिष्टोऽस्मि आज्ञप्तोऽस्मि
गोपालेनेत्यन्वयः । कीदृशेन गोपालेन श्रीमता लक्ष्मीवता लक्ष्मीवत आज्ञा अवश्यं विधेयेति भावः । पुनः
कीदृशेन गोपालेन सकलाः सामंताः मंडलेश्वराः तेषां चक्रं समूहः तस्य चूडामणयो मुकुटमणयः ते
षां मरीचिमंजर्यः किरणपरंपराः ताभिः नीराजितं चरणकमलं यस्य तादृशेन । पुनः कीदृशेन बलवं
तो ये अरिपुजाः तेषां वक्षःस्थलमेव कपाटं तस्य पाटनं विदारणं प्रकटितनरसिंहरूपं येन । पुनः कीदृशेन
प्रबलतराणि यानि नरपतिकुलानि तेषां प्रलयो विनाशः स एव महार्णवस्तस्मिन्मग्ना मेदिनी तस्याः स

मुद्धरणे वराह इव वराहः तेन । पुनः कीदृशेन निखिलाः समस्ताः दिग्रूपाः विलासिन्यो वरांगनाः तासां अकर्णपूरैः
कर्णपूरः संपन्नः कर्णपूरीकृतः श्रवणालंकारीकृतः कीर्तिलतापल्लवो येन । एतेन दिगंतविश्रांतकीर्तिर्ध्वनि
तं । पुनः कीदृशेन समस्ताः ये आशाः स्तंबेरमा दिग्गजाः तेषां कर्णतालास्फालनेन बहलतरो यः पवनः तेन
नर्तितः प्रतापरूपोऽनलो यस्य तादृशेन । एतेन दिगंतविश्रांतप्रताप इति ध्वनितं । आज्ञप्तोऽस्मीत्युक्ते तामाज्ञा
मेव दर्शयति । यथेति । खलु प्रसिद्धौ । अस्य सहजसुहृदः स्वभावकोमलस्य कीर्तिवर्मदेवस्य नाम्नो राज्ञः

खल्वस्य सहजसुहृदो राज्ञः श्रीकीर्तिवर्मदेवस्य दिग्विजयव्यापारांततरितपरब्रह्मानंदैरस्माभिः समु
न्मीलितविविधविषयरसस्पर्शसुखिता इव अतिवाहिता दिवसाः ॥ इदानीं कृतकृत्या वयं ॥ नीताः क्षयं
क्षितिभुजो नृपतेर्विपक्षा रक्षावती क्षितिरभूत्प्रथितैरमात्यैः ॥ साम्राज्यमस्य विहितं क्षितिपालमौ
लिमालार्चितं भुवि पयोनिधिमेखलायां ॥ ३ ॥

श्रीकीर्तिरेव वर्म कवचं यस्येति वा । तस्य यो
दिग्विजयः तद्व्यापारेणांतरितो विलंबितः परब्रह्मानंदरसो येषां तादृशैरस्माभिः समुन्मीलिताः स
म्यगनुभूताः विविधा अनेकप्रकाराः विषयाः स्रगादयः तेषां रसस्पर्शेन आनंदानुभवेन सुखिता इव विषयसु
खस्य हेयत्वादिति भावः । दिवसा अतिवाहिताः अतिक्रांताः कृतकृत्यतां दर्शयति । नीता इति । नृपतेर्वि
पक्षाः वैरिणः क्षितिभुजो भूमिपालाः क्षयं नीताः प्रापिताः प्रथितैः ख्यातैः अमात्यैः मंत्रिभिः क्षितिः
रक्षावती अभूत् । अस्य नृपतेर्भुवि साम्राज्यं विहितं कृतं । कीदृशं साम्राज्यं क्षितिपालानां मौलिमालामुकु

ष्ठेणयः ताभिर्विरचितं पूजितं। कीदृश्यां भुवि पयोनिधयः सागरा एव मेखला परिखा यस्याः सा। कृतकृत्य
ता प्रयोजनमाह। तदयमिति। शांतरसप्रायः शांतरसप्रधानो यः प्रयोगाभिनयो नाट्यनुकारः तेनेत्यर्थः।
आत्मविनोदोपायमाह। तद्यदिति। तत्रभवद्भिः पूज्यैः अत्रभवत्तत्रभवच्छब्दौ पूज्यार्थौ। परिक्रम्येत्यंतं सुगमं।
तदयं शांतरसप्राय प्रयोगाभिनयेनात्मनो विनोदयितुमिच्छामः। तद्यत्पूर्वं तत्रभवद्भिः श्रीकृष्णमिश्रैः
प्रबोधचंद्रोदयं नाम नाटकं निर्माय भवतः समर्पितमासीत्। तदद्य राज्ञः श्रीकीर्तिवर्मणः पुरस्तादभि
नेतव्यं भवता। अस्ति चास्य भूपतेः परिषदस्तदवलोकने कुतूहलमिति। तद्भवतु गृहं गत्वा गृहिणीं। स
माहूय संगीतमनुतिष्ठामि। परिक्रम्य नेपथ्याभिमुखमवलोक्य। आर्ये इतस्तावत्।। प्रविश्य नटी।। एसम्हि।
आणवेदु अज्जउत्तो को णिओओ अणुचिट्ठिअदु त्ति॥ सूत्रधारः। आर्ये विदितमेव भवत्या। गो। अस्ति त
त्यर्थिपृथ्वीपति विपुलबलारण्यमूर्छत्प्रतापज्योतिर्ज्वालावलीढत्रिभुवनविवरो विश्वविश्रांत
कीर्तिः। गोपालो भूमिपालान् प्रसभमसिलताभित्रमात्रेण जित्वा साम्राज्ये कीर्तिवर्मा नरपति
तिलकं येन भूयोऽभ्यषेचि।।४।। नेपथ्ये नाट्यं। वाक्यपरिबंधः अये इतस्तावदिति। नटी।
एषाम्हि। आज्ञापयत्वार्यपुत्रः। यो नियोगोनुष्ठीयतामिति। कथं विदितमित्याह अस्तीति। गोपालो अस्तीति यो
जना। कीदृशो गोपालः प्रत्यर्थिनो रिपवः ये पृथ्वीपतयः तेषां विपुलं बहलं बलं सैन्यं तदेव अरण्यं तस्मिन्
मूर्छन् वृद्धिं प्राप्नुवन् यः प्रतापः स एव ज्योतिः तज्ज्वालयावलीढमाक्रमितं त्रिभुवनस्य विवरं येन स तं पु २

नः कीदृशः। विश्वस्मिन् विश्रांता कीर्तिर्यस्य। स कः। येन कीर्तिवर्मा नरपतितिलकः भू
यः साम्राज्ये अभिषेचितः अभिषिक्तः। किं कृत्वा असिलतेव खड्गवल्लीव मित्रं सहायः तन्मा
त्रेण भूमिपालान् प्रसभं हठेन जित्वा। खड्ग एव तस्य सहायो नान्य इत्यर्थः। तस्य कर्मांतरम
प्याह। अपि चेति। वितते विस्तृते नादैः शब्दैः अद्यापि इदानीमपि यस्य यशांसि उद्गायंति।
अपि च।। अद्यापि उन्मदयातुधानतरुणीचंचत्करास्फालनव्यावल्गन्नकपालतालरणितैर्नृत्यत्पिशा
चांगनाः। उद्गायंति यशांसि यस्य विततैर्नादैः प्रचंडानिलप्रक्षुभ्यत्करिकुंभकूटकुहरव्यक्तैरणक्षो
णयः।।५।। तेन च वयं शांतरसप्रस्थितेन आत्मनो विनोदार्थं प्रबोधचंद्रोदयाभिधानं नाटकमभिनेतुमा
दिष्टाः स्मः। तदादिश्यतां भरताः वर्णिकापरिग्रहाय। नटी। विस्मयं। अज्जउत्त अच्चरिअं जेण तधा
णिअभुअबलणिक्कमेक्के णिब्भासितसअलराअमंडलेण। आअण्णअ अट्टिक रिण कोदंडदंड बहल्लव
रिवसतस
कीदृशैः नादैः प्रचंडानिलेन महावायुना प्रक्षुभ्यंतो ये करिणः तेषां कुंभाः तेषां कूटं समूहः तस्य कुहराणि बिला
नि तेषु व्यक्तैः वायुपूर्णो निःसरंति कुंभस्थलानि शुष्काणि ध्वनंतीति भावः। पुनः कीदृशैः नादैः उन्मदा उत्कलिका
रूपा तन्नव्यावल्गंति चपलानि यानि नकपालानि तान्येव तालाः वाद्यविशेषाः तेषां रणितानि शब्दितानि ये
षु। कीदृश्यो रणक्षोणयः संग्रामभूमयः नृत्यंतः पिशाचानां अंगना यासु ताः।।५।। एतावता किं स्यादित्यत आह।
तेन चेति। अभिनेतुं अभिनयेन प्रदर्शयितुं अभिनयप्रदर्शने किमपेक्षते। तदादिश्यतामिति। भरता नटाः वर्णि

कापरिग्रहाय नरावेश्वपरिग्रहाय। नटी प्राकृतं। अज्जेति। आर्यपुत्र आश्चर्यमाश्चर्यं। येन समरविजयल
क्ष्मी आसादिता श्राहेति प्राकृत श्रांते प्राकृतेनान्वयः। किंकृत्वा कर्णसैन्यसारं निर्मथ्य। केन कमिवा म
धुमथनेन श्रीकृष्णेन क्षीरसमुद्रमिव। यथा क्षीरसागरं निर्मथ्य श्रीकृष्णेन श्री लब्धा एवं तेन राज्ञे ल
क्ष्मीः। कथंभूतेन येन मधुमथनेन च। यथा तेन उक्तप्रकारेण निजभुजबलविक्रमेण केन निर्भर्त्सितं सक
लराजमंडलं येन। कीदृशं कर्णसैन्यसारं आकर्णकृष्टः कठिनो यः कोदंडदंडः तस्मादुत्पन्नाः ये शरा नि

रणि अरजज्जरिजंततुरअतरंगमालं। णिरंतरणिवडंतितिसव्वंविसिक्खित्त सहस्स सरसपव्वउद्धत्तुंग
माअंगमहामहिहर सहस्सं। भम्मंत। भुअदंडमंदराभिघाददुमंत सअलपत्तिसलिलसंघादं। कण्णसे
ण्णासारं णिम्महिअ मेहुमहणेण क्खीरसमुद्दं। आसादिदा। समरविजयलच्छीः। तस्स पदं सअलमुणि
अणसअलाहिदिणिज्जवीरचरिदस्स कधमेदि सो उवसमो संवुत्तो।। सूत्रधारः।।

करो बाणसमूहः तेन जर्जरीकृताः तुरंगा एव तरंगमाला यस्मिन्। पुनः कीदृशानि निरंतरं निपतंति। तीक्ष्णं वि
क्षिप्तानि उद्धतानि तैः। पतितानि उन्नखाणि सहस्राणि अपरिमितानि उन्नखाणि तैः। पलरूढाः पर्यस्ताः उत्तुंगा ये मत
ङ्गाः करिणः त एव महीधराः पर्वताः तत्सहस्रं यस्मिन्। पुनः कीदृशं सागरं भ्रमन्त्यो भुजदंडः प्रपंचो मंदरः तदभि
घातेन घूर्णमानाः सकलाये पत्तयः त एव सलिलसंघातो जलसमूहो यस्मिन्। तस्मात्। तस्य सांप्रतं सकलमुनि
जनश्लाघितवीरचरितस्य कथमीदृश उपशमः संवृत्तः। निसर्गसौम्य स्वभावसौम्य। सकलेति। सकला
ये भूपालाः तेषां कुलं तत्र प्रलयकालाग्निवदुग्रः। क्रूरः चेदिपतिना चेदिदेशाधिपतिना राज्ञा समुन्मीलितः

समुत्पादितः सोमवंश्यानां राज्ञां कीर्तिधर्मप्रभृतीनां क्षितावाधिपत्यं स्थिरीकर्तुं अयमस्य संरंभः क्रोधो नैमित्ति
कः न स्वाभाविकः। अमुमर्थं प्रकारांतरेणाह। कल्पांतेति। वातः तस्य यः संक्षोभः तेन लंघिताः अत एव प्रकंप
वंताः येन तस्य महोदधेः सागरस्य ता एव स्वाभाविका एव। स्थैर्यप्रसादमर्यादाः स्थैर्यं निश्चलता प्रसादः स्वच्छ
ता मर्यादा स्थैर्यं निश्चलता मर्यादा लोकानतिलंघन तथाविधाः तादृशाः पुरुषाः पुनः शांतिमेव प्रपद्यंते। प्राकृ

अयं निसर्गसौम्यमेव ब्राह्मं ज्योतिः। कुतोपि कारणात् प्राप्तविकारमपि पुनः स्वभावमेवावतिष्ठते। यतः। स
कलभूपालकुलप्रलयकालाग्निरूपेण चेदिपतिना समुन्मीलितं च सूनृतं यपार्थिवानां पृथिव्या माधिपत्यं
स्थिरीकर्तुमयमस्य संरंभः। पाठ्य। तथा। कल्पांतवातसंक्षोभलंघिताशेषभूभृतः। स्थैर्यप्रसादमर्याद
स्ता एव हि महोदधेः।।८।। अपि च। भगवन्नारायणांगसंभूताः प्रहितायतयाविधापौरुषभूषणाः
पुरुषाः क्षितिमवतीर्य निष्पादितकृत्याः पुनः शांतिमेव प्रपद्यंते। यथा परशुराममेवाकलयतु भवती। तावत्।।

वंति। किंकृत्वा क्षितिं प्रति अवतीर्य। किमर्थं भूतहिताय प्राणिनां हिताय पौरुषमेव पुरुषार्थमेव भूषणं येषां ते।
येनेति। सोपि स्ववीर्यादित्येन युग्मं। सोपि श्रीमान् जामदग्न्यो मुनिः तपोभिः प्रशांतकोपज्वलनः सन्नाशग
म्यति शांतिं गच्छति। किंकृत्वा नृपाणां कुलं समुत्खाय समुत्पाट्य भं मभोरं स्ववीर्यादेवतीर्यैः चेति योजनाद्धिती
यश्लोकस्य। अनेन कृतकृत्यता दर्शिता। स कः येन त्रिसप्तकृत्वः एकविंशतिवारं भूरिस्युतयत् रुधिरं तस्य स
रितृ तस्य वारिपूरे अभिषेकः स्नानं तर्पणं च लोकाः रिक्तं। कीदृशे वारिपूरे नृपाणां राज्ञां बहुलो भव्यान्नवसातु
ढूं मांसं तेन सहस्रं मांसं च मस्तिष्कं पंकः ललाटीतगैतो धातुश्च एतानि प्राग्भारे तीरे नीरे यस्य तादृशेन पुनः

५ सकः यस्या सो कुठारः परशुः क्षत्रियश्च बाला श्च वृद्धाश्च तान्येवावधिः तदवधि यन्निधनं मारणं तद्वधौ तस्मि
न्कृते येन निर्दयो अतिकठिनः विश्रुतः विख्यातः कीदृशः कुठारः राजन्यानां उच्चाः ये अंसाः स्कंधास्तेषां कूटस
मुदायः तस्य कथने विनाशे पटुः कुशलः करतः ते शब्दायमाना घोरा भयानका धारा यस्य ॥ दृष्टांतिकमा
ह । तथायमिति । विवेकमोहयोर्जयपराजयावनयोरनायासेन प्रवेशयितुं संगतिमारचयति । येन चेति । येन कृतेः

येन त्रिःसप्तकृत्वो नृपबहलवसामांसमस्तिष्कपंकप्राग्भारे कारि भूरिच्युतरुधिरसरिद्वारि पूरे
भिषेकः ॥ यस्य स्त्री बालवृद्धावधिनिधनविधौ निर्दयो विश्रुतोसौ राजन्योच्चांसकूटक्रथनपटु रटद्
घोरधारः कुठारः ॥७॥ सोपि स्ववीर्योद्वतीर्य भारभूमेः समुत्खाय कुलं नृपाणां ॥ प्रशांतकोपज्व
लनस्तपोभिः श्रीमान्मुनिः शाम्यति जामदग्न्यः ॥८॥ तथायमपि कृतकर्तव्यः संभूतिपरमुपश
मनिष्ठामाप्तः ॥ येन च । विवेकेन विनिर्जित्य कर्णं मोहमिवार्जितं । श्रीकीर्तिवर्मनृपतेर्बोधस्येवोदयः
कृतः ॥९॥ आः पापशैलूषाधम कथमस्मासु जीवत्सु स्वामिनो महामोहस्य विवेकस्य सकाशात्पराजय
मुदाहरसि

तं वृत्तवंतं कर्णं निर्जित्य श्रीकीर्तिवर्मनृपतेरभ्युदयः उत्कर्षः कृतः । तत्र दृष्टांतः विवेकेनेव आत्मतादात्म्य
ज्ञानेनेव मोहं संसारमूलकारणमिव निर्जित्य बोधस्येव आत्मसाक्षात्कारस्येव उदयः कृतः ॥९॥ ॥
आः पापेति । शैलूषाधमेन राधम ॥७॥ उत्तुंगेति । अयं कामः एति समीपं याति । कीदृशः कामः पुलकिते
न रोमांचितेन भुजेन रत्या उत्तुंगं अत्युच्चं पीवरं मांसलं यत्कुचद्वयं तेन पीडितं अंगं यथा भवति तथा आ ५

लिंगितः पुनः कीदृशः श्रीमान् शोभावान् जगंति । सचेतनानि मदयन् मत्तानि कुर्वन् यथा नयनयोः अभिरा
मः तथा मदेन घूर्णिते नेत्रकमले यस्य सः । भ्रांतनेत्रः प्रस्तावना कथासंगतिः । यथानिर्दिष्ट इति पूर्वश्लोक
इति शेषः । आः पापेति पठित्वेति । पापशैलूषाधमेति पूर्वश्लोकाभिनिशेष : भरताधमनराधमेत्यर्थः ॥
प्रभवतीति । विदुषां पंडितानां शास्त्रसंभवो विवेकः तावत्पर्यंतं प्रभवति समुत्पद्यते । यावत्पर्यंतं इंदीवरा

उत्तुंगपीवरकुचद्वयपीडितांगमालिंगितः पुलकितेन भुजेन रत्या ॥ श्रीमान् जगंति मदयन्नयनाभि
रामः कामोयमेति मदघूर्णितनेत्रपद्मः ॥१०॥ मदुचनीच ॥ अप्यनुपजातक्रोधउर्वीपल्लक्ष्यते । तदप
सरणमेवास्माकमितः श्रेयः । इति निष्क्रांतो । प्रस्तावना । ततः प्रविशति यथानिर्दिष्टः कामो रति
श्च । कामः सक्रोधं । आः पापेति पठित्वानुरे भरताधम । प्रभवति मनसि विवेको विदुषामपि शा
स्त्रसंभवस्तावत् । निपतंति दृष्टिविशिखा यावन्नेंदीवराक्षीणां ॥११॥ रम्यं हर्म्यतलं नवाः सुनयनाः
गुंजद्विरेफा लताः प्रोन्मीलन्नवमल्लिकासुरभयो वाताः सचंद्राः क्षपाः ॥ यद्येतानि जयंति हंत परि
तः शस्त्राण्यमोघानि मे तत्को नाम गुणो विवेकविभवः कीदृक्च बोधोदयः ॥१२॥

क्षीणां कमललोचनानां दृष्टिविशिखाः कटाक्षरूपबाणाः न निपतंति । तासां कटाक्षप्रक्षेपैः अंधीभूतस्य चेतनं
भवतीति भावः । रम्यं हर्म्यतलमिति ॥ एतानि मेमम अमोघानि सफलानि शस्त्राणि परितः सर्वतः जयंति । य
दि सर्वोत्कृष्टानि वर्तंते । भो शैलूषाधम असौ शैलूषाधम वर्णितो विवेकः तस्य विभवः सामर्थ्यं कीदृक् अथ प्र
बोधोदयः कीदृक् द्वयमपि न संभवतीति भावः । एतानि कानि तान्याह ॥ रम्यमिति । रम्यं हर्म्यस्य गृहस्य तलं

भृमिः। नवाः नूतनाः सुनयनाः लोचनाः गुंजंतः शब्दं कुर्वंतः द्विरेफाः यासुताः तादृश्यो लताः प्रोन्मीलन्त्यो वि
कसनशीलाः नूपाः माल्लिकाः मालत्यः सुरभयोवाताः सुगंधावायवः सचंद्रातपाः निशाः एतानि मेशस्त्राणि
इतिः। रतिः। आर्यपुत्र गुरुः खलु महाराजमहामोहस्य प्रतिपक्षोविवेकइतितर्कयामि॥ कामः। त्वंस्त्रीस्वभावसु
लभंभयंमाकुरु। अहमतिसमर्थोस्मीत्याह॥ अपियदिविशिखाइति। अपिययद्यपिविशिखाः शराः शरासनं
धनुः एतद्वयंकुसुममयंपुष्पमयंवर्तते। तथापिससुरासुरंदेवदैत्यैः सहवर्ततेयत्सुरासुरंअखिलंसमग्रंमदं
रतिः। अज्जउत गुरुअं क्खुमहाराअमहामोहस्सपडिवक्खोविवेओत्तितक्केमि॥ कामः। प्रियेकृतस्तवेदं
स्त्रीस्वभावसुलभंविवेकाद्भयमुत्पन्नं॥ पश्य॥ अपियदिविशिखाः शरासनंवाकुसुममयंससुरासुरंत
थापि। ममजगदखिलंवरोरुनाज्ञामिदमतिलंघ्यधृतिंमुहूर्तमेति॥१३॥ तथाहि। अहल्यायाजारस्सु
रपतिरभूदात्मतनयांप्रजानाथोयासीदभजतगुरोरिंदुरबलां॥ इतिप्रायःकोवानपदमपथेकारयदहं
श्रमोमद्बाणानांकइवभुवनोन्माथविधिषु॥१४॥
जगत्भो वरोरु ममाज्ञाम अतिलंघ्य उल्लंघ्य धृतिंधैर्यंमुहूर्तंक्षणमपिनैतिनप्राप्नोति॥ उक्तमर्थंप्रकटयति॥ त
थाहि। अहल्यायांजारइति। सुरपतिः इंद्रः अहल्यायांगौतमपत्न्यांजारः उपपतिरभूत्। प्रजानाथो
ब्रह्मा आत्मतनयांस्वतनूपादिआसीत्। स्वपुत्रींप्रतिगतः मिथुनभावप्राप्तः इंदुः गुरोर्बृहस्पतेः अ
बलांस्त्रियंअभजतसिषेवे। इत्येवंप्रकारेण प्रायोअतिशयेनमयाकोवापुमान् पुरुषार्थः अपथेअमा
र्गेपदंस्थानंनकार्यतकिंतुसर्वोपिकारितएवेत्यर्थः। किमधिकंवाच्यं। भुवनानांउन्माथउन्मादः तद्वि
धिषुतत्कर्तव्यतासुमदीयायेबाणास्तेषांश्रमः कइवनकोपीत्यर्थः॥१४॥

रतिः। आर्यपुत्र एवमेवैतत्। महासहायसंपन्नः शंकितव्योअरातिः। यतः अस्य यमनियमप्रमुखाः अमात्यामहाबलाः श्रूयते॥ कामः। अभियुक्तमात्रात् प्रतिकूलप्रसंगात् इंगितवशीघ्रंविघटिष्यतेविवेकादिद्राक्ष्यते।
अहिंसेति। कोपस्यअहिंसाकेवनकापीत्यर्थः। ममकामस्यब्रह्मचर्यादयः केनकेपीत्यर्थः। अमीसत्यास्तेयाः
अपरिग्रहाः लोभस्यपुरतः के एतावता एतसुखेनजेतुंशक्याइतिभावः। यमादेः किंकार्यंमतत आह॥ यमे
रतिः। अज्जउत्त एवंणेदं। तथापिमहासहाअसंपण्णोसंकिदव्वोअराद्दि। जदोस्सजमणिअमप्पमु
हाअमच्चामहाबलासुणीअंति। कामः। प्रियेयानेतान्राज्ञोविवेकस्यबलवतोयमादीनमात्यान्
पश्यसि। तएतेनियतमस्माभिरभियुक्तमात्रात् इंगितविघटिष्यते। तथाहि। अहिंसाकेवकोप
स्यब्रह्मचर्यादयोमम॥ लोभस्यपुरतः केमीसत्यास्तेयापरिग्रहाः॥ यमनियमासनप्राणायाम
प्रत्याहारध्यानधारणसमाधयस्तुनिर्विकारैकाग्र्यचित्तसाध्यत्वादीषत्करमुन्मूलनाएव॥ अपिच।
स्त्रियएवअमीषांरुत्याः तेनैतेसमंदुश्चराएववर्तंते। यतः। संतुविलोकनभाषणविलासपरिहासकेलि
परिरंभाः॥ स्मरणमपिकामिनीनामलमिहमनसोविकाराय॥१५॥
ति। ईषत्करं सुकरंसमुन्मीलनंनाशोयेषांते॥ एतेषांविजयेउपायांतरमाह॥ स्त्रियएवेति। अस्माद्दुश्चराः अस्म
दधीनाः अर्थान्तरंहेतुमाहयतइति। संत्विति। विलोकनंअवलोकनंभाषणंमधुरालापः विलासाश्चित्रमः प
रिहासः केलिः नर्मकथाक्रीडापरिरंभः आलिंगनंइमानिसंतुतिष्ठंतु। कामिनीनांस्मरणमपिमनसोविका
रायविकारंकर्तुंअलंसमर्थं। किंबहुनातेषुअस्माद्दुर्गोस्थास्यत्येवेत्याह॥ विशेषतस्त्वेति। अभियुज्यमाना

आज्ञप्यमानानरपतिमंत्रिणः महामोहस्त।मंत्रिणं अधर्मे अधर्मेमूलाः मोहादयः॥ रतिः। सुद्मेति। श्रुतंमया युष्माकं रामदमविवेकप्रभृतीनांच एकमुत्पत्तिस्थानमिति। आः आश्चर्ये एकपित तादृश्चयें। तदेवाह। तथाहि ति। ॥१५॥ संभूतइति। परमात्मनः संगात् सर्वधातु मायायां अविद्यायाम नउति तनूजः पुत्रः विश्रुतः लोकप्रसिद्धः प्रथमं आदौ संभूतः। उत्पन्नः तेनमन साउदं त्रैलोक्यं विसृज्य विशेषतः सृष्ट्वा अनंतरं। भूयोवारंवारा। उदं प्रसि

विशेषतश्च मदमात्सर्यदंभादिभिः अस्मत्स्वामिवलभैरभिसुज्यमानानरपतिमंत्रिणो अधर्मेनेवाश्र यिष्यंति॥ रतिः॥ सुद्मम एतुत्पाणं समदमविवेअपहर्तृणां च एकं उत्पत्तिस्थानमिति॥ कामः आः प्रिये किमुच्यते। एकमुत्पत्तिस्थानमिति। ननु जनक एवास्माकमभिन्नः। तथाहि। संभूतः प्रथममीश्वरसं गान्मायायांमनइति विश्रुतस्तनूजः। त्रैलोक्यमकलमिदं विसृज्य भूयस्तेनाथो जनितमिदं कुलद्वयंनः॥१६॥ तस्यचप्रवृत्तिनिवृत्ती द्वेधार्म्यपत्न्यौ॥ तयोःप्रवृत्त्यामुत्पन्नं महामोहप्रधानमेकं कुलं नि वृत्त्यां चाहूतं द्वितीयं विवेकप्रधानमिति॥ रतिः॥ अज्ज उत्त जा एव्वं ता किंणिमित्तं तुह्माणं सोअराणं पि परोप्परं वेरं॥

द्वेनोस्माकं कुलद्वयं जनितं महामोहप्रधानं विवेकप्रधानंवा तदेवाह॥ तयोरिति॥ परस्परं एतादृशं वैरं सोदरामपि दृष्टमेस्तिवेरमित्याह॥ अज्जेति॥ आर्यपुत्रयद्येवंतत्किंनिमित्तं सोदराणां युष्माकं परस्परं एतादृशं वैरं सोदराणामपिदृष्टमस्तिवेरमित्याह॥ ॥ ॥ ॥एकामिषमिति॥ सोदराणां

ति:

गोत्रजानां एकामिषप्रभवमेववैरं समुज्जंभते। प्रकटीभवतीति। जगतिप्रसिद्धं अत्र दृष्टांतमाह॥ निश्चितं कुरुपांडवानां पृथ्वीनिमित्तं यथा स्यात्तथाती। भ्रातृदारुणः तथा अतिप्रसिद्धः भुवनक्षयकृत् भुवननाशकोविरोधः अभवत्। एकामिषप्रभवत्वं दर्शयति॥ रतिः॥ शांतंपापंपापं आर्यपुत्र किंमिदपापं द्वेषमात्रकेणवतेराट्

कामः प्रिये। एकामिषप्रभवमेवसहोदराणामुज्जंभतेजगतिवैरमितिप्रसिद्धं। पृथ्वीनिमित्तमभवत्कुरुपांडवानांतीव्रस्तथाहि भुवनक्षयकृद्विरोधः॥१७॥ सर्वमेवैतज्जगदस्मत्पित्रोपार्जितंतत्रास्माभिस्तातवल्लभतयासर्वमेवाक्रांतं॥ तेषांतु विरलप्रचारः। तेनएतेपापाः सांप्रतंपितरमस्मांश्चोन्मूलयितुमुद्यताः॥ रतिः॥ सत्तंपापंपावं अज्जउत्त किंएदं पावं विद्देसेमेत केणते हिराग्गं अहवा अत्थि उवाओ को वि एत्तिमं तिदेशः॥ कामः॥ अस्त्यत्रकिंचिन्निगूढबीजं। रतिः सभयं। अं अउत्त ता किंन उग्घाटिअदि। अज्जउत्त केरिसत्तं। कामः। प्रियेनभेतव्यं हताशानामात्रमेतत्॥ अस्तिकिलपापा किंवदंती। अत्रास्माकंकुलेकालरात्रिकल्पा विद्यानाम राक्षसी समुत्पत्स्यत इति॥१८॥

व्यं। अथवा अस्त्युपायः कोप्यत्रमंत्रतः। निगूढं गुप्तं बीजं कारणं। आर्यपुत्र नत्किंनोद्घाट्यते कीदृशं तत्। हताशानां नष्टाशानां किंवदंती जनश्रुतिः। लोकप्रसिद्धिर्नतु निश्चयः विद्या आत्मसाक्षात्कारः क्रूरकर्मणा राक्षसीत्युक्तिः॥१८॥ ॥कालिंदीकेलिकल्लोलकोलाहलकुतूहलः॥ कृष्णः करोतिकल्याणं कंसकुंजरकेसरी॥१७॥

रतिः॥ हाधिक् रकथमस्माकं कुले राक्षसीव पुत्रेमे हृदयं॥ किंवदंती मात्रमेतत्॥ इति पुनश्वा
सनं॥ अथ तयो राक्षस्या। किं कर्त्तव्यं॥ प्राजापत्या हिरण्यगर्भसंबंधिनी सरस्वती॥ वाणी॥ पुंसः प
रमेश्वरस्य गृहिणी। स्वीमनोरूपं तनयं पुत्रं प्रसूय उत्पाद्य लोकानुप्रभुवादीन् क्रमात् श्रुतीरितान्
सृष्टिक्रमागेण असृजत जनयामास॥ कीदृशस्य पुंसः संगेन संबंधेन समुज्झितस्य रहितस्य
सगोत्रीयपुरुषस्येति श्रुतेः॥ कीदृशी मायातेनपुंसा अस्पृष्टापि असंबद्धापि॥ जनयतीति अयुक्तमिति मा

रतिः॥ सभयं॥ हद्धि रकथं अम्हाणं कुले रक्खसी। ति केवदि मे हिअं॥ कामः॥ प्रिये न भेतव्यं। किंवदं
ती मात्रमेतत्॥ रतिः॥ अथ ताए रक्खसीए किं कादव्वं। कामः॥ अस्ति किल तत्र प्राजापत्या सरस्वती॥
पुंसः संगसमुज्झितस्य गृहिणी मायेति तेनाप्यसावस्पृष्टापि मनः प्रसूय तनयं लोकाननुसृतक्रमा
त्॥ तस्मादेव जनिष्यते पुनरसौ विद्येति कन्या यया ना तस्ते च सहोदरा च जननी सर्वं च भक्ष्यं कुलं॥ अर्ध
रतिः॥ सत्रासोत्कंपं॥ अज्जउत्त परित्ताहि२ इति भर्तारमालिंगति॥ कामः॥ स्पर्शसुखमभिनीय। आस्व
गतं॥ ७॥

शोभतीयं॥ चुंबकपाषाणेन असंबंधा लोहशलाका चुंबकमनुयातीति दृष्टलोकेनादृष्टमित्यर्थः। अघटितघटना
पटीयस्याः इदं सर्वमपि संभाव्यत इत्याह॥ मायेति विशेषणेन पुनः शब्दः अनंतरार्थः पुनः अनंतरं असौ विद्ये
ति प्रसिद्धा कन्या तस्मात् द्विमनसः सकाशात् जनिष्यति उत्पत्स्यते। असौ का। यस्याः तातः पिता ते सहोदरा बांध
वाश्च जननी माता सर्वं कुलं कुलांतःपातित्वात् आत्मापि द्वाणीय इति सर्वं तवैव भक्ष्यं। आर्यपुत्र परित्राहि२ स्वग
तं मनस्येव॥ ७॥

स्फुरदिति॥ अधीराक्ष्याः चपलाक्ष्याः परीरंभः आलिंगनं मोदं आनंदं जनयति। उत्पादयति संमोहयति च। सं
मोहो विषयांतरास्मरणं करोतीत्यर्थः॥ कीदृशः परीरंभः स्फुरन् रोमोद्गमः रोमांचो यस्मिन् सः। पुनः कीदृ
शः भयेन उत्कटः कंपो ययोस्तौ उत्तुंगौ उच्चौ स्तनौ च तयोर्युग्मं तस्य भरः तदासंगेन संबंधविशेषेण सुभगो म
नोहरः पुनः कीदृशः गुंजद्ध्वनायमानं मणिवलयं यस्याः तादृशी दोर्लता बाहुवल्ली तया रचितः संपादितः कीं

स्फुरद्रोमोद्भेदस्तरलतरताराकुलदृशो भयोत्कंपोत्तुंगस्तनयुगभरासंगसुभगः॥ अधीराक्ष्या गुंज
न्मणिवलयदोर्वल्लिरचितः परीरंभो मोदं जनयति च संमोहयति च॥ १९॥ प्रकाशं॥ दृढं परिष्वज्य प्रिये
न भेतव्यं। अस्मासु जीवत्सु कुतो विद्योत्पत्तिः॥ रतिः॥ अथ किं ताए दूर रक्खसीए उप्पत्ती तुम्हाणं पदि
वक्खाणं सम्मदा॥ कामः॥ बाढं सा खलु विवेकेनोपनिषद्देव्याः प्रबोधचंद्रेण भ्राता सम जनयित
व्या। तत्र सर्वं एतेषां मदमादयः प्रतिपन्नोद्योगाः॥ रतिः॥ अज्जउत्त कहं एदेहिं अप्पणो विणासका
रिणी एविज्जा एडुप्पत्ती तेहिं दुच्चिणी। देहे सल्लाहिज्जदि। सहजमलिनवक्रभावभाजो भवंति भवः प्र
भवात्मनाशहेतुः॥ जलधरपदवीमवाप्य धूमो ज्वलनविनाशमनुप्रयाति नाशं॥ २०॥

तरलेति॥ अधीराक्ष्याः तरलतरतारा अक्ष्णः कनीनिका तया आकुला व्याकुला दृग्यस्याः॥ रतिः॥ अथ किं तस्या राक्ष
स्याः उत्पत्तिर्युष्माकं प्रतिपक्षाणां सम्मता॥ बाढं॥ अवश्यं समेति शेषः साखल्विति अविद्या अना। सतत्रत्मा
कारांतःकरणवृत्तिः अनावृतब्रह्माकाशेन करवृत्तिः उपहितं चैतन्यं प्रबोधः आर्यपुत्र कथमेते रागमनोवि
नाशकारिण्या विद्यया उत्पत्तिमेते दुर्विनीताः श्लाघ्यते। एतेन ते दुर्विनीताः विद्याया उत्पत्तिः कथं श्लाघ्यत इति प्राय

तं॥ सहजेति। मलिनं दुष्टं अतएव वक्रंभावं चित्ताभिप्रायं भजंति सेवंते। एतेषां भवउत्पत्तिः प्रभवस्य उत्पत्तिस्थान
स्य आत्मनश्च नाशहेतुर्भवति। उक्तेर्थे अर्थांतरन्यासः॥ धूमो जलधरपदवीमवाप्य मेघमार्गमध्यं तं गत्वा स्वोत्पत्ति
स्थानं वह्निः स्तत्राशं अनुनाशं प्रयाति॥ धूमोपि मलिनवक्रभावश्चेति भावः॥ नेपथ्ये। जवनिकायां॥ गुरोरिति।
अवलिप्तस्य सगर्वस्य उत्पथप्रतिपन्नस्य उन्मार्गगामिनः शेषं सुगमं। गाथापदसंदर्भरूपा॥ अनेनेति। जन
केन मनसा अहंकारानुवर्तिना अहंकाराध्याससयुक्तेन जगत्पित्रः पितेव परमेश्वर एव य एव रागादिभिरिति।
नेपथ्ये। आः पापदुरात्मन् कथमस्मानेव पापकारिण इत्याक्षिपति। रु। ननु रे। गुरोरप्यवलिप्तस्य का
र्याकार्यमजानतः॥ उत्पथप्रतिपन्नस्य परित्यागो विधीयते॥ इति पौराणिकी गाथा पुराणविदउदाह
रंति। अनेन चास्माकं जनकेन अहंकारानुवर्तिना जगत्पतिस्तावत् पितेव बद्धः मोहादिभिस्तत्सएव
बद्धः सुदृढतां नीतः॥ कामः। प्रिये विलोक्यस्य अयमस्माकं कुलज्यायान् दृश्यामत्यासह विवेकः इत एव
वाभिवर्तते। य एषः रागादिभिः स्वरसवाहिभिरान्तरं कांतिर्निर्भर्त्स्यमानइवमानघनेकृशांगः मत्या
नितांतकलुषीकृतया शशांकः कांस्यवसाद् तुहिनांतरितो विभाति॥ २३॥
एष पूर्वोक्तो विवेकः मत्या बुद्ध्या विभाति। कथंभूतया मत्या रागादिभिः नितांतं अतिशयेन कलुषीकृतया। की
दृग्भिः रागादिभिः स्वरसवाहिभिः अविविच्यस्वेच्छाप्रवृत्तैः कीदृशः आदिशब्दान्मोहादयः तैः आंतरकांतिर्यस्य
उल्लसते। निर्भर्त्स्यमानइव निःप्रभाक्रियमाणइव मानएव धनं यस्य। कृशानि अंगानि यस्य केन कस्य कांत्या
शंकर इव कीदृशः शशांकः कांस्येनापि बिंबेन तुहिनेन अंतरितः आच्छादितः॥ ७॥ ॥ ॥ ॥

अग्रिमश्लोके पत्कारः॥ ततः किं स्यादत आह॥ जातोहमिति॥ विद्वान् ईश्वरः अविद्यामयीम
विद्याप्रधानां निद्रां प्राप्य बहुविधाननेकाकारान् निमान् स्वप्नान् पश्यति॥ कीदृशोपि विद्या वि
घूर्णितः विस्मृतः स्वस्वरूपः पुनः कीदृशः चित्तस्य मनसः स्पंदितं चेष्टितं तस्य कल्पना स्वप्ना
अनुपतन्॥ अनुगच्छन्॥ इमान् कानित्याह॥ जातोहमित्यादि। जनको ममेष इति ये जना॥ सुगम
जातोहं जनको ममैष जननी क्षेत्रं कलत्रं कुलं पुत्रा मित्रमरातयो वसु बलं विद्या सुहृद्बांधवाः॥
चित्तस्पंदितकल्पनामनुपतन् विद्वान् विद्यामयीं निद्रामेत्य विघूर्णितो बहुविधान्स्वप्नानिमान्
पश्यति॥ २४॥ मतिः॥ अज्जउत एवं दीहतरणिद्दाविद्दाविअपवोहपरमेसुरेकधंवोहोप्य
त्तिभविस्सदि। राजा। सलज्जो भूमुरवस्तिष्ठति॥ मतिः॥ अ उ किंति गुरुअरलज्जाभरणभिदसेअ
रोवुन्नीभूदोसि॥ राजा॥ प्रिये सेर्ष्याय णयोषिता भवति हृदयं तेन सापराधमिवात्मानं शंके॥ म
तिः॥ अज्जउत अण्णताइस्थितया ७३ णा ॐ सरसपउत्तसंबोधं माथवापारपसिअ सभन्तु
णोहिअलिअहिंणंति॥ मन्यत॥ मतिः॥ आर्यपुत्र एवं दीर्घतरं निद्राविद्रावितप्रबोधप
रमेश्वरे कथं वो धोत्पत्तिर्भविष्यति। राजा सलज्जेति। मतिः॥ आर्यपुत्र किमिति गुरुतरलज्जाभरनभि
न्नस्वेद रक्तलीभूतोसि। राजा॥ प्रिये सेर्ष्यामित्यादि आत्मानं शंके इत्यंतं सुगमं॥ मतिः॥ अन्या स्त्री
यः॥ पास्वरसप्रवृत्तस्य बाधमर्थव्यापारप्र स्थितस्य वा भर्तुर्हृदयस्थितं न प्रीतिः॥ ७॥ ॥

राजा। प्रिये। मानिन्या इति। यदि उपनिषद्देव्याः मया सह संगमः स्यात्तदा प्रबोधोदयः प्राप्त इत्यन्वयः। कीदृश्याः
उपनिषद्देव्याः मानिन्याः स्त्रीणां ईर्ष्याकृतः कोपो मान इत्यभिधीयते।। ईर्ष्याकृतकोपवत्याः चिरं विप्रयोगो वि
योगः तेन जनिता या असूया ईर्ष्या तया आकुलायाः व्याकुलायाः संगमे हेतुः शांत्यादेरनुकूलत्वात् इति हेतोस्तत
रमाह।। भवतीति। भवती विषयानपास्य मुहूर्तं न स्थीतिश्चेत्।। तदा जाग्रत्स्वप्नसुषुप्ति धामविरहादिति। धा
मशब्दोत्र स्थानवाचकः। धामानि त्रीणि भवंति स्थानानि नेत्रा मानिजन्मानीति रुद्रकोशः। तथा चायमभिप्रायः।

राजा। प्रिये। मानिन्याश्चिरविप्रयोगजनितासूयाभवे छांत्यादेरनुकूलत्वादुपनिषद्देव्या मया संगमः।। न
भवती चेद्विषयानपास्य भवती तिष्ठेन्मुहूर्तं ततो जाग्रत्स्वप्नसुषुप्ति धाम विरहात्प्राप्तः प्रबोधोदयः।। २८।। मतिः।
अज्जउत्त एवं कुलपहुणो दिढगंटिणिबंधस्स विवन्धमोक्खो भोदि ततो ता एणि चाणुबंधो ज्जेव अज्जउ
त्तो भोदुत्ति सुप्पमे पिअं। राजा। यद्येवं प्रसन्नासि सिद्धास्तर्हि चिरमस्माकं मनोरथाः।।

जाग्रदाद्यभिमानस्थानाभावात् शांत्यादिमतो विचारप्रवृत्तस्य बुद्ध्यो संगाभावात्प्रबोधोत्पत्तिरिति।
मतिः। आर्यपुत्र यद्येवं कुलप्रभोर्दृढग्रंथिनिबद्धस्यापि बद्धमोक्षो भवति। तदा नया नित्यानुबंध एव
आर्यपुत्रो भवत्विति सुष्टु मे प्रियं। आर्यपुत्र दृढग्रंथिरहंकारः तन्निबद्धस्य तदभिमानितो पिय इति बंध मो
क्षः संसारान्निवृत्तिः तदा तया अनादिप्रायया नित्यानुबंध एव अहंकाराभिमान्येव सर्वदा भवत्विति प्रा
कृतान्वयः अहंकारपरस्परं मते नित्यत्वात्तन्नाशाभावादिति भावः।। ९।।